प्रोक्तमधीयते कठाः। मौदाः। पैप्पलादाः। [1]आर्चाभिनः। वाजसनेयिनः। ब्राह्मणानि खल्वपि – [2]ताण्डिनः। भाल्लविनः। शाट्यायनिनः। ऐतरेयिणः। ब्राह्मणग्रहणं किं, यावता छन्द एव तद्? ब्राह्मणविशेषप्रतिपत्त्यर्थम्। इह [3]तद्विषयता मा भूत्, याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्क्यानि[4]। सौलभानि (म. भा. २.२८५)। चकारोऽनुक्तसमुच्चयार्थः। कल्पे – [5]काश्यपिनः। कौशिकिनः। सूत्रे – [6]पाराशरिणो भिक्षवः। शैलालिनो नटाः (म. भा. २.२८६)। कर्मन्दिनः। कृशाश्विनः। छन्दोब्राह्मणानि इति किम्? पाणिनीयं [7]व्याकरणम्। [8]पैङ्गी कल्पः (म. भा. २.२८६)॥

## तदस्मिन्नस्तीति देशे तन्नाम्नि। (६७/१२७९)

तत् इति प्रथमा समर्थविभक्तिः। अस्मिन् इति प्रत्ययार्थः। अस्ति इति प्रकृत्यर्थविशेषणम्। इतिकरणो विवक्षार्थः। देशे तन्नाम्नि इति प्रत्ययार्थविशेषणम्। तत् इति प्रथमासमर्थादस्मिन् इति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थमस्ति चेत् तद् भवति, यद् अस्मिन् इति निर्दिष्टं देशश्चेत् स तन्नामा भवति, प्रत्ययान्तनामा, इतिकरणस्ततश्चेद् विवक्षा। उदुम्बरा अस्मिन् देशे सन्ति औदुम्बरः[9]। बाल्बजः। पार्वतः। मत्वर्थीयापवादो योगः॥

## तेन निर्वृत्तम्। (६८/१२८०)

तेन इति तृतीयासमर्थात् निर्वृत्तम् इत्येतस्मिन् [10]विषये यथाविहितं प्रत्ययो भवति [11]देशनामधेये गम्यमाने। देशे तन्नाम्नि (४.४.६७-७०) इति चतुर्ष्वपि योगेषु सम्बध्यते। सहस्रेण निर्वृत्ता[12] [13]साहस्री परिखा। कुशाम्बेन [14]निर्वृत्ता कौशाम्बी नगरी। हेतौ कर्तरि च यथायोगं[15] तृतीया समर्थविभक्तिः॥

## तस्य निवासः। (६९/१२८१)

तस्य इति षष्ठीसमर्थान् निवासः इत्येतस्मिन्नर्थे[16] यथाविहितं प्रत्ययो भवति [17]देशनामधेये गम्यमाने। निवसन्त्यस्मिन्निति निवासः। [18]ऋजुनावां निवासो देशः आर्जुनावो [19]देशः। [20]शैबः। [21]औदिष्ठः॥

## अदूरभवश्च। (७०/१२८२)

[22]पूर्वा समर्थविभक्तिरनुवर्तते। तस्य इति षष्ठीसमर्थात्[23] अदूरभवः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति[24]। विदिशायाः [25]अदूरभवं नगरं वैदिशम्[26]। [27]हैमवतम्। चकारः पूर्वेषां त्रयाणाम्[28]र्थानामिह [29]सन्निधानार्थः। तेनोत्तरेषु[30] चत्वारो[31]ऽप्यर्थाः सम्बध्यन्ते॥

---

1. आर्चनायिनः ह. 2. काण्डिनः ह. 3. तद्विषयो ह. 4. ब्राह्मणानि इत्यधिकम् ह. 5. काश्यपेन प्रोक्तमधीयते इत्यधिकम् ब. क. फ. ह. 6. पाराशर्येण प्रोक्तम् अधीयते इत्यधिकम् क. ड. 7. सूत्रम् इत्यधिकम् ग. 8. पिङ्गेन प्रोक्तः कल्पः इत्यधिकम् ग. 9. देशः इत्यधिकम् ह. 10. अर्थे ब.क.ह. 11. देशनामाभिधेये क. 12. परिखा इत्यधिकम् फ. 13. साहस्रा क. 14. कृता ग. फ. 15. च इत्यधिकम् क. 16. विषये क. 17. देशनामाभिधेये क. 18. ऋजुनावानां क. 19. देशः नास्ति फ. 20. शिबीनां देशः शैबः ह. 21. औष्ट्रः ह, आविष्टः ब. 22. षष्ठी ब, पूर्वस्मात् क. 23. प्रातिपदिकात् इत्यधिकम् क. 24. देशनामधेये गम्यमाने इत्यधिकम् ड. ह. 25. अदूरभवो ग्रामः वैदिशः फ. 26. नगरम् इत्यधिकम् ह. 27. त्रैहिमतम् ब. क. फ, प्रैहिमतम् ह. 28. अर्थानाम् नास्ति फ. ह. 29. सन्निधानार्थम् ह. 30. योगेषु इत्यधिकम् ड. फ. ह. ब. 31. अर्थयोगाः ह.